









श्रीमत् वेदान्त रामानुज मुनि करुणालब्ध वेदान्त युग्मम्
श्रीमत् श्रीवास योगीश्वर गुरुपदयोर्पित स्वात्मभारम्
श्रीमत् श्रीरङ्गनाताह्वय मुनिकृपया प्राप्त मोक्षाश्रमं तं
श्रीमत् वेदान्त रामनुज मुनिमपरम् संश्रये देशिकेन्द्रम्



श्रीमत् श्रीवास योगीश्वर मुनि करुणालब्ध वेदान्त युग्मम्
श्रीमत् वेदान्त रामानुज गुरुपदयोर्पित स्वात्मभारम्
श्रीमत् श्रुत्यन्त रामानुज यति नृपतेः प्राप्त मोक्षाश्रमं तं
श्रीमत् श्रीवास रामनुजमुनिं संश्रये ज्ञानवार्धिम्



वेदान्त लक्ष्मण मुनीन्द्र कृपात्त बोधम्
तत्पाद युग्म सरसीरुह भृङ्गराजम्
त्रय्यन्त युग्म कृतभूरि परिश्रमं तं
श्रीरङ्ग लक्ष्मणमुनिम् शरणं प्रपद्ये

# श्री चतुः श्लोकी

***shrI chatuH shlokI***

# श्री चतुः श्लोकी

**श्रीमान् वेङ्कटनाथार्यः कवितार्किक केसरी। वेदान्तचार्य वर्यो मे सन्निधत्तां सदा हृदि ॥**

स्वादयन्निह सर्वेषां त्रय्यन्तार्थं सुदुर्ग्रहम्। स्तोत्रयामास योगीन्द्रः तं वन्दे यामुनाह्वयम् ॥

यत्पदां भोरुहध्यान विध्वस्ताशेष कल्मषः। वस्तुतां उपयातोहम् यामुनेयं नमामि तम् ॥

नमो नमो यामुनाय यामुनाय नमो नमः। नमो नमो यामुनाय यामुनाय नमो नमः ॥

***कान्तस्ते पुरुषोत्तमः फणिपतिः शय्याऽऽसनं वाहनं***
***वेदात्मा विहगेश्वरो यवनिका माया जगन्मोहिनी।***
***ब्रह्मेशादि सुरव्रजः सदयितः त्वत्-दास-दासीगणः***
***श्रीरित्येव च नाम ते भगवति ब्रूमः कथं त्वां वयम्*** ॥ [1]

यस्यास्ते महिमानमात्मन इव त्वद्वल्लभोऽपि प्रभुः
नालं मातुमियत्तया निरवधिं नित्यानुकूलं स्वतः।
तां त्वां दास इति प्रपन्न इति च स्तोष्याम्यहं निर्भयः
लोकैकेश्वरि लोकनाथदयिते दान्ते दयां ते विदन् ॥ [2]

ईषत् त्वत्-करुणा निरीक्षण सुधा सन्धुक्षणाद्-रक्ष्यते
नष्टं प्राक् तदलाभतः त्रिभुवनं संप्रत्यनन्तोदयम्।
श्रेयो न ह्यरविन्दलोचनमनः कान्ताप्रसादादृते
संसृत्यक्षर वैष्णवाध्वसु नृणां संभाव्यते कर्हिचित् ॥ [3]

# श्री चतुः श्लोकी

शान्तानन्त महाविभूति परमं यद्ब्रह्म रूपं हरेः

मूर्तं ब्रह्म ततोऽपि तत्प्रियतरं रूपं यदत्यद्भुतम् ।

यान्यन्यानि यथासुखं विहरतो रूपाणि सर्वाणि तानि

आहुः स्वैरनुरूप रूप विभवैर् गाधोप गूधानि ते ॥ [4]

*आकारत्रय सम्पन्नाम् अरविन्द निवासिनीम् ।*

*अशेष जगदीशित्रीम् वन्दे वरदवल्लभाम् ॥* [5]

**कवितार्किक-सिंहाय कल्याणगुणशालिने । श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥**